# Shri Kali Kshama AparAdha Stotram

# શ્રીકાલીક્ષમાઽપરાધસ્તોત્રમ્

## Document Information

Text title : Kali Kshama Aparadha Stotram

File name : kAlIkShamAparAdhastotram.itx

Category : devii, devI, dashamahAvidyA

Location : doc_devii

Transliterated by : Aruna Narayanan

Proofread by : Aruna Narayanan

Latest update : June 13, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 13, 2021

*sanskritdocuments.org*

Shri Kali Kshama AparAdha Stotram

# શ્રીકાલીક્ષમાઽપરાધસ્તોત્રમ્

પ્રાગ્દેહસ્થોય દાહં તવ ચરણ યુગાન્નાશ્રિતો નાર્ચિતોઽહં
    તેનાદ્યા કીર્તિવર્ગૈર્જઠરજદહનૈર્બાદ્ધ્યમાનો બલિષ્ઠૈઃ ।
ક્ષિપ્ત્વા જન્માન્તરાન્નઃ પુનરિહભવિતા ક્વાશ્રયઃ ક્વાપિ સેવા
    ક્ષન્તવ્યો મેઽપરાધઃ પ્રકટિત વદને કામરૂપે કરાલે ॥ ૧॥

વાલ્યેવાલાભિલાયૈર્જડિત જડમતિર્બાલલીલા પ્રસક્તો
    ન ત્વાઞ્જાનામિ માતઃ કલિકલુષહરા ભોગમોક્ષ પ્રદાત્રીમ્ ।
નાચારો નૈવ પૂજા ન ચ યજન કથા ન સ્મૃતિનૈવ સેવા
    ક્ષન્તવ્યોમેઽપરાધઃ પ્રકટિત વદને કામરૂપે કરાલે ॥ ૨॥

પ્રાપ્તોહં યૌવનઞ્ચેદ્વિષધર સદૃશૈરિન્દ્રિયૈર્દૃષ્ટ ગાત્રો
    નષ્ટ પ્રજ્ઞઃ પરસ્ત્રી પરધન હરણે સર્વદા સાભિલાષઃ ।
ત્વત્પાદામ્ભોજ યુગ્મક્ષણમપિ મનસા ન સ્મૃતોહં કદાપિ
    ક્ષન્તવ્યો મેઽપરાધઃ પ્રકટિત વદને કામરૂપે કરાલે ॥ ૩॥

પ્રૌઢોભિક્ષાભિલાષી સુત દુહિતૃ કલત્રાર્થ મન્નાદિ ચેષ્ટ
    ક્વ પ્રાપ્સ્યે કુત્રયામી ત્વનુદિનમનિશં ચિન્તયામગ્ન દેહઃ ।
નોતેધ્યાનન્ત ચાસ્થા ન ચ ભજન વિધિન્નામ સઙ્કીર્તનં વા
    ક્ષન્તવ્યોમેઽપરાધઃ પ્રકટિત વદને કામરૂપે કરાલે ॥ ૪॥

વૃદ્ધત્વે બુદ્ધિહીનઃ કૃશ વિવશતનુશ્શ્વાસકાસાતિસારૈઃ
    કર્ણનિહોઽક્ષિહીનઃ પ્રગલિત દશનઃ ક્ષુત્પિપાસાભિભૂતઃ ।
પશ્ચાત્તાપેનદગ્ધો મરણમનુદિનં ધ્યેય માત્રન્નચાન્યત્
    ક્ષન્તવ્યો મેઽપરાધઃ પ્રકટિત વદને કામરૂપે કરાલે ॥ ૫॥

કૃત્વાસ્નાનં દિનાદૌ ક્વચિદપિ સલિલં નોકૃતં નૈવ પુષ્પ
    તે નૈવેદ્યાદિકઞ્ચ ક્વચિદપિ ન કૃતં નાપિભાવો ન ભક્તિઃ ।
ન ન્યાસો નૈવ પૂજાં ન ચ ગુણ કથનં નાપિ ચાર્ચાકૃતાતે
    ક્ષન્તવ્યો મેઽપરાધઃ પ્રકટિત વદને કામરૂપે કરાલે ॥ ૬॥

જાનામિ ત્વાં ન ચાહં ભવભયહરણીં સર્વ સિદ્ધિપ્રદાત્રી
    નિત્યાનન્દોદયાઢ્યાં ત્રિતય ગુણમયી નિત્ય શુદ્ધોદયાઢ્યામ્ ।
મિથ્યાકર્માભિલાષૈઃ અનુદિનમભિતઃ પીડિતો દુઃખ સઙ્ઘૈઃ
    ક્ષન્તવ્યો મેઽપરાધઃ પ્રકટિત વદને કામરૂપે કરાલે ॥ ૭॥

કાલાભ્રાં શ્યામાલાઙ્ગીં વિગલિત ચિકુરા ખગ઼્ગમુણ્ડાભિરામાં
    ત્રાસ ત્રાણેષ્ટદાત્રીં કુણપગણશિરો માલિનીં દીર્ઘનેત્રામ્ ।
સંસારસ્યૈકસારાં ભવજન ન હરામ્ભાવિતોભાવનાભિઃ
    ક્ષન્તવ્યો મેઽપરાધઃ પ્રકટિત વદને કામરૂપે કરાલે ॥ ૮॥

બ્રહ્મા વિષ્ણુસ્તથેશઃ પરિણમતિ સદા ત્વત્પદામ્ભોજ યુક્તં
    ભાગ્યાભાવાન્ન ચાહમ્ભવ જનનિ ભવત્પાદ યુગ્મં ભજામિ ।
નિત્યં લોભ પ્રલોભૈઃ કૃતવિશમતિઃ કામુકસ્ત્વાં પ્રયાષે
    ક્ષન્તવ્યો મેઽપરાધઃ પ્રકટિત વદને કામરૂપે કરાલે ॥ ૯॥

રાગદ્વેષૈઃ પ્રમત્તઃ કલુષયુત તનુઃ કામનાભોગ લુબ્ધઃ
    કાર્યાકાર્યા વિચારી કુલમતિ રહિતઃ કોલસઙ્ઘૈર્વિહીનઃ ।
ક્વધ્યાનન્તે ક્વચાર્ચા ક્વમનુજપનન્નૈવ કિઞ્ચિત્ કૃતોઽહં
    ક્ષન્તવ્યો મેઽપરાધઃ પ્રકટિત વદને કામરૂપે કરાલે ॥ ૧૦॥

રોગી દુઃખી દરિદ્રઃ પરવશકૃપણઃ પાંશુલઃ પાપ ચેતા
    નિદ્રાલસ્ય પ્રસક્તાસ્સુજઠરભરણે વ્યાકુલઃ કલ્પિતાત્મા ।
કિં તે પૂજા વિધાનં ત્વયિક્વચનુમતિઃ ક્વાનુરાક્વચાસ્થા
    ક્ષન્તવ્યો મેઽપરાધઃ પ્રકટિત વદને કામરૂપે કરાલે ॥ ૧૧॥

મિથ્યા વ્યામોહ રાગૈઃ પરિવૃતમનસઃ ક્લેશસઙ્ઘાન્વિતસ્ય
    ક્ષુન્નિદ્રૌઘાન્વિતસ્ય સ્મરણ વિરહિણઃ પાપકર્મ પ્રવૃત્તે ।
દારિદ્યસ્ય ક્વધર્મઃ ક્વચજનનિરુચિઃ ક્વસ્થિતિસ્સાધુ સઙ્ઘૈઃ
    ક્ષન્તવ્યો મેઽપરાધઃ પ્રકટિત વદને કામરૂપે કરાલે ॥ ૧૨॥

માતસ્તાતસ્યદેહજનનિ જઠરગઃ સંસ્થિતસ્ત્વદ્વશેહન્
    ત્વં હર્ત્રા કારયિત્રી કરણ ગુણમયી કર્મહેતુ સ્વરૂપા ।
ત્વં બુદ્ધિશ્ચિત્ત સંસ્થાપ્યયહમતિભવતી સર્વમેતત્ક્ષમસ્વ
    ક્ષન્તવ્યો મેઽપરાધઃ પ્રકટિત વદને કામરૂપે કરાલે ॥ ૧૩॥

ત્વં ભૂમિસ્ત્વઞ્જલઞ્ચ ત્વમસિ હુતવહસ્ત્વઞ્જગદ્વાયુરૂપા

ત્વઞ્ચાકાશમ્મનશ્ચ પ્રકૃતિરસિ મહત્પૂર્વિકા પૂર્વપૂર્વા ।
આત્માત્વઞ્ચાસિમાતઃ પરમસિભવતી ત્વત્પરન્નૈવ કિઞ્ચિત્
ક્ષન્તવ્યો મેઽપરાધઃ પ્રકટિત વદને કામરૂપે કરાલે ॥ ૧૪॥

ત્વં કાલી ત્વઞ્ચતારાત્વમસિ ગિરિસુતા સુન્દરી ભૈરવી ત્વં
ત્વં દુર્ગા છિન્નમસ્તા ત્વમસિ ચ ભુવના ત્વં હિ લક્ષ્મીઃ શિવા ત્વમ્ ।
ધૂમા માતઙ્ગિનીત્વં ત્વમસિ ચ બગલા મઙ્ગલાદિસ્તવાખ્યા
ક્ષન્તવ્યો મેઽપરાધઃ પ્રકટિત વદને કામરૂપે કરાલે ॥ ૧૫॥

સ્તોત્રેણાનેન દેવીમ્પરિણમતિ જનો યઃ સદાભક્તિયુક્તો
દુષ્કૃત્યા દુર્ગસઙ્ઘં પરિતરતિ શતં વિઘ્નતાં નાશમેતિ ।
નાધિર્વ્યાધિ કદાચિદ્ભવતિ યદિ પુનસ્સર્વદા સાપરાધઃ
સર્વં તત્ કામરૂપે ત્રિભુવન જનનિ ક્ષામયે પુત્ર બુદ્ધ્યા ॥ ૧૬॥

જ્ઞાતા વક્તા કવીશો ભવતિ ધનપતિર્દાનશીલો દયાત્મા
નિઃષ્પાપી નિઃષ્કલઙ્કી કુલપતિ કુશલસ્સત્યવાગ્ધાર્મિકશ્ચ ।
નિત્યાનન્દો દયાઢ્યઃ પશુગણવિમુખસ્સત્પથા ચારુશીલઃ
સંસારાબ્ધિં સુકેન પ્રતરતિ ગિરિજા પાદયુગ્માવલમ્બાત્ ॥ ૧૭॥

॥ ઇતિ શ્રીકાલીક્ષમાઽપરાધસ્તોત્રં સમાપ્તમ્ ॥

Encoded and proofread by Aruna Narayanan

*Shri Kali Kshama AparAdha Stotram*
pdf was typeset on June 13, 2021

Please send corrections to *sanskrit@cheerful.com*